# दर्शनम्

## सांख्यम्

'सांख्य' इति शब्दस्य अर्थः सम्यग्ज्ञानम् । महर्षिः कपिलः सांख्यदर्शनस्य प्रधानप्रवक्ता । तस्य रचितस्य ग्रन्थस्य नाम 'सांख्यसूत्रम्' इति । अस्मिन् दर्शने पञ्चविंशतत्त्वनि उपलब्धानि । तानि तत्त्वानि क्रमेण वदामि । प्रथमतत्त्वस्य नाम 'प्रकृतिः' इति । एषा सांख्य दर्शनस्य प्रधानतत्त्वम् । तदनन्तरं 'महत्' इति नामकं द्वितीयं तत्त्वम् । सांख्यदर्शनस्य तृतीयं तत्त्वम् भवति 'अहंकारः' इति । तत्परं 'इन्द्रियम्' इति तत्त्वं विद्यते । इन्द्रियाणां संख्या अत्र एकादशविधानि । अतःपरं पञ्चतन्मात्रानि नामकतत्त्वानि विराजन्ते । तत्परं पञ्चमहाभूतानि भवन्ति। अन्तिमे पुरुषं समेत्य पञ्चविंशतत्त्वानि प्रतिष्ठितानि । एकादश-इन्द्रियाणां मध्ये पञ्चज्ञानेन्द्रियं पञ्चकर्मेन्द्रियं च भवतः । 'मनः' इति अन्तरिन्द्रियम् अपि भवति । 'चक्षु-कर्ण-नासिका-जिह्वा-त्वक्' इति पञ्चज्ञानेन्द्रियाणि । 'वाक्-पाणि-पाद-पायु-उपस्थ' इति पञ्चकर्मेन्द्रियाणि । पञ्चतन्मात्रानि भवन्ति 'रुप-रस-गन्ध-स्पर्श-शब्द' इति। पञ्चमहाभूतानि भवन्ति 'अग्नि-जलम्-भूमि-वायु-आकाश' इति ।

सांख्यदर्शने त्रिविधानि प्रमाणानि स्वीकृतानि यथा- प्रत्यक्षम्, अनुमानम, शब्दः च इति। प्रकृतिः सत्त्व-रजः-तमः इति गुणत्रयस्य समन्वये गठिता । सृष्टेः मूलकारणम् भवति प्रकृतिः।

# व्याकरणम्

## भर्तृहरिः

आचार्यः भर्तृहरिः पञ्चमशतकस्य वैयाकरणः। तस्य विरचितस्य ग्रन्थस्य नाम 'वाक्यपदीयम्'। अयं ग्रन्थः काण्डत्रये विभज्यते यथा- आगमकाण्डः, वाक्यकाण्डः, पदकाण्डः च इति। आचार्यः भर्तृहरिः महर्षेः पतञ्जलेः परवर्तिकालिनः।